नन्दिकेश्वरमते माहेश्वरसूत्राणां वैशिष्ट्यं तेषामुपयोगश्च

Dr. P.N. Sudarsanan

उपोद्घातः

व्याकरणशास्त्रस्य मूलभूतानि चतुर्दशसूत्राणि माहेश्वरसूत्राणि कथ्यन्ते। 'तत आगत' इत्यनेन सूत्रेण आगतेऽर्थे अण् प्रत्ययः। महेश्वरादागतानि माहेश्वराणि। पाणिनिः इमानि चतुर्दशसूत्राणि महेश्वरप्रसादात् प्राप्तवान् इत्यर्थः। एषां सूत्राणां कृते अक्षरसमाम्नायशब्दस्य प्रयोगः क्रियते। श्रुतिरेषा -

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रेक्तं तस्मै पाणिनये नमः ।।

अनुबन्धकरणार्थः वर्णानामुपदेशः इत्युक्तं भाष्ये। अत्र करणशब्दप्रयोगेणानुबन्धानां सादित्वं सूचितम्। ऋक्तन्त्रव्याकरणे शाकटायनेनोक्तम् - इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतीरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते न भुक्त्वा न नक्तं ब्रूयाद् ब्रह्मराशिः इति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः।

संस्कृतभाषायाः लौकिकी अक्षरमाला

अ आ इ ई उ ऊ ऋ ऌ ए ऐ ओ औ
क ख ग घ ङ
च छ ज झ ञ
ट ठ ड ढ ण
त थ द ध न
प फ ब भ म
य र ल व श ष स ह।

भाषा तावद्वाक्यरूपा, वाक्यानि पदैः घटितानि, पदानि अक्षरैः आरभ्यन्ते, अक्षराणि वर्णैः उपकल्पितानि। तथा च घटादिपदार्थानां परमाणव इव भाषायाः उपादानकारणं वर्णाः। निरवयव एकत्वव्यवहारार्हः स्फुटो नादो वर्ण इति तस्य लक्षणम्। तत्र स्वयमुच्चारणार्हो वर्णः स्वरः, तदनर्हं व्यञ्जनम्। व्यञ्जनानां स्वयमुच्चारणाक्षमत्वम् तेषु एकैकस्मिन्नपि प्रथमस्वरः अकारो योजितः। तथा च वयमक्षराण्येव लिखामो न तु वर्णान्; अत एव च अक्षरमाला इति व्यवहरामो न तु वर्णमालेति। यद्यप्यक्षराणां वर्णैः आरब्धत्वात् वर्णानामेव लिपिभिः विन्यासो न्याय्यः, तथापि व्यञ्जनानां स्वरपरतन्त्राणां स्वयमुच्चारितुमशक्यत्वात् अक्षराणामेव लिपिसंज्ञितानि चिह्नानि पूर्वैः कल्पितानि। युरोपदेशीयास्तु स्वस्वभाषालेखने वर्णानेवोपयुञ्जते, न त्वक्षराणि। यथा 'श्री' इत्येकां लिपिं Sri इति तिसृभिः लिखन्ति आङ्गलेयाः।।

अविभाज्य एको नादो वर्णः; केवलो व्यञ्जनसंसृष्टो वा स्वरः एकोऽक्षरम् इति वर्णाक्षरयोर्भेदः। अनेन च केवलः स्वरो वर्ण इति अक्षरमिति च द्वावपि व्यपदेशावर्हतीति स्फुटम्। केवलं तु व्यञ्जनं वर्ण एव। केवला एव स्वरा लिपिषु स्वस्वचिह्नैः निर्दिश्यन्ते; व्यञ्जनसंसृष्टास्तु चिह्नान्तरैरेव लिख्यन्ते।

यथा क् अ अ उ क

क् अ आ उ का etc.

लौकिकीमत्र प्रदर्शितामक्षरमालां पाणिनिः क्रमभेदं कृत्वा सूत्रात्मना निबध्नाति। यानि सूत्राणि

१. महेश्वरादधिगतानीत्यैतिह्यात् माहेश्वरसूत्राणीति।

२. अक्षरपाठरूपत्वात् अक्षरसमाम्नाय इति।

३. प्रत्याहाराख्यसंकेतोपयोगित्वात् प्रत्याहारसूत्राणीति।

४. चतुर्दशसंख्याकत्वात् चतुर्दशसूत्रीति च व्यवह्रियते।

तानि चेमानि -

१.	अ ह उ (ण्)	८.	झ भ (ञ्)
२.	ऋ ऌ (क्)	९.	घ ढ ध (ष्)
३.	ए ओ (ङ्)	१०.	ज ब ग ड द (श्)
४.	ऐ औ (च्)	११.	ख फ छ ठ थ च ट त (व्)
५.	ह य व र (ट्)	१२.	क प (य्)
६.	ल (ण्)	१३.	श ष स (र्)
७.	ञ म ङ ण न (म्)	१४.	ह (ल्)

अत्र चायं रचनाक्रमः - प्राधान्यात् प्रथमं स्वराः। तत्र अ, इ, उ इति मूलस्वरैः प्रथमं सूत्रम्। रेफलकाररूपव्यञ्जनांशोपस्कृताभ्यां ऋ - ऌभ्यां द्वितीयम्। अ अ इ उ ए; अ अ उ उ ओ इति मूलस्वर द्वयसंकीर्णाभ्यां ए-ओ-भ्यां तृतीयम्। अ अ अ उ आ; आ अ ए उ ऐ; आ अ ओ उ औ संकीर्णाकारविशिष्टसंसृष्टिरूपाभ्यां ऐ-औभ्यां चतुर्थम्। ए ओ ऐ औ इत्येते स्वराः संकररूपत्वात् संध्यक्षराणि इत्युच्यन्ते। स्वरानन्तरं स्वराणां पूर्णव्यञ्जनानां च मध्यपतितत्वात् मध्यमव्यपदेशभाग्भिः यवरलैः पञ्चमषष्ठे सूत्रे। इ, उ, ऋ, ऌ इति स्वराणां य व र ल इति मध्यमानां च सगर्भ्याणां भ्रातृणामिव कोऽपि सजातीयो धर्मः प्रकटमुपलभ्यते; तत्र इ, उ, ऋ, ऌ इति स्वराणां क्रममनुसर्तुं यवरल इति (यरलव इति लौकिकक्रमात् भिन्नः) क्रमः उपात्तः। मध्यमानन्तरं वर्ग्याः पठयन्ते। ते च सांप्रदायिकीं रीतिमुल्लङ्घय खराः प्रथक्, अतिखराः पृथक् इत्यादि भङ्ग्या संधीकृत्य (अनुनासिकः, घोषः, मृदुः, अतिखरः, खरः इति) व्युत्क्रमेण परिगणिताः। वर्गेभ्यः परम् ऊष्माणः पठिताः।

अत्र हकारः एकः व्यञ्जनानां आदावन्ते चेति द्विरुपात्तः। सूत्रसीवने च मध्येमध्ये विच्छेदद्योतनार्थमिव ण्, क्, ङ् इत्यादयः केवलव्यञ्जनरूपाः ग्रन्थयो निवेशिताः। अन्ते श्रूयमाणानां एषां केवलव्यञ्जनानां 'इत्' इति संज्ञा कृता। अन्यत्रापि (आगमादेशप्रत्ययादिषु) इत्संज्ञितानि व्यञ्जनानि आलोजयति आचार्यः। इदं नानाप्रकाराणि प्रयोजनानि उद्दिश्य क्रियते। अक्षरसमाम्नाये तावत् इतां प्रत्याहारः प्रयोजनम्। प्रत्याहारो नाम मध्यपतितानाम्

ग्रहणाय आद्यन्तयोर्मेलनम्। तथा हि-उद्दिष्टमेकमक्षरमादाय तेन सह सूत्रान्तपठितानामितां योजनेन संपादितः शब्दः मध्यगतानां वर्णानां संज्ञा भवति, यथा-'अण्' इति अ इ उ वर्णानां संज्ञा; अक् इति लृपर्यन्तानाम्, अच् इति औपर्यन्तानाम्। अत एव 'अच्' इति स्वराणां प्रत्याहारः, 'हल्' इति व्यञ्जनानां, अल्-इति वर्णमात्रस्य। हकारस्य द्विरुपादानं तस्य 'अट्' - प्रत्याहारेण, 'शल्' प्रत्याहारेण च ग्रहणार्थम्।

स च अक्षरसमाम्नायः नन्दिकेश्वरेण ब्रह्मपरतया व्याख्यातः। अतः तदत्र प्रदर्श्यते।

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारं
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।। १

इति। नटराजराज इत्यनेन मङ्गलानि दर्शितानि। विश्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वान्नटराजराजः। स तु आत्मतत्वं वागाद्यगोचरं - इति ज्ञापनार्थं ढक्कानिनादव्याजेन सनकादीनुद्धर्तुकामः चतुर्दशवारं स्वान्तर्गतमात्मतत्वं प्रकटयितुं नृत्तावसाने ढक्कां नादितवान्। अहं तदेतद् वितननिनादोद्भूतवर्णात्मकमाद्यमतिरहस्यमेतच्छिवसूत्रजालं - शिवसम्बन्धिसूत्रसमूहं कल्याणरूपसूत्रसमूहं वा सफुटीकरोमि इत्यर्थः।

अस्मिन् अक्षरसमाम्नाये अन्त्यावर्णचतुर्दशम् (अनुबन्धाः) धातुमूलकशब्दशास्त्रप्रवृत्यर्थम् - अन्त्यवर्णजालं शब्द इति न्यायेन। तथा चोक्तं इन्द्रेण 'अन्त्यवर्णसमुद्भूता धातवः परिकीर्तिताः' इति।

अइउण्

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः।। २

तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुवनानां च समुद्भवरूपं स्वात्मतत्त्वमुपदिष्टमित्याह - अकारो ब्रह्मेति। अः - परमेश्वरः निर्गुणः इं - मायामाश्रित्य उः - व्यापकः सगुणः ण् - ईश्वरः आसीत् इति सूत्रार्थः। अत्र प्रमाणं - 'असद्वा इदमग्र आसीत्ततो वै सदजायत' इति श्रुतिः। असद्ब्रह्म वै निश्चयेन अग्रे सृष्टेः पूर्वमिदमकाररूपाक्षरात्मकमासीत्, ततो

अक्षरात् असतो वै सगुणमजायत - जातमिति तदर्थः तदुक्तं गीतायां - अक्षराणां अकारोऽस्मि इति।

अकारः सर्ववर्णाद्यः प्रकाशः परमेश्वरः।
आद्यमन्त्येन संयोगादहमित्येव जायते।। ३

'आदिरन्त्येन सहेता' इतिवत् अत्रापि अकारेण अन्त्यो हकारः, अकारादिहकारान्ताः वर्णाः परमात्मनः एव अभवन् इत्यर्थः।

ऋलृक्

ऋलृक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत्
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत्।। ४

ननु सर्ववेदान्तेषु परमेश्वर एक इति निश्चितत्वात् मायामिं चित्कलां समाश्रित्य जगद्रूपोऽभूदित्युक्तेः अद्वैतहानिः स्यादित्याशङ्कायामाह ऋलृक् इति। ऋ उ परमेश्वरः, लृ - मायाख्यां मनोवृत्तिं कृ अदर्शयत्। तामेवाश्रित्य स्वेच्छया जगज्जनयामास इत्यर्थः। 'ऋ परमेश्वरः' इत्यत्र 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' इति श्रुतिः प्रमाणम्। ऋतं तत्पदार्थं परं ब्रह्म सत्यमित्यर्थः।

एओङ्

एओङ्मायेश्वरात्म्यैक्यमिज्ञानं सर्ववस्तुषु
साक्षित्वात्सर्वभूतानां स एक इति निश्चितम्।।५

ननु 'जनयामास' इत्युक्ते जन्यजनकभावे अद्वैतहानिः स्यादित्याशङ्कायां "तत्सृष्ट्वा तदेवानुप्राविशत् इति श्रुतिमाश्रित्य आह एओङ्मायेश्वरेति। जन्यजनकत्वं च स्वस्यैव तद्रूपेण वर्तमानत्वादिति नाद्वैतहानिः। अकारोकाराभ्यां निष्पन्न प्रणवरूपेण ओंकारेण सगुणनिर्गुणयोरैक्यबोधितेनैव दृष्टान्तेन सर्वत्रैक्यबुद्धौ द्वैतनाशो ध्वनितः। समष्टिव्यष्टिभेदेन पूर्ववर्णयुतद्वितीयस्य तद्युक्ततृतीयस्य च समन्वयबोधकमिदं सूत्रम्। अ उ अक्षरात्मकः इ उ मायायुक्तः सन् यः स उ उ ज्ञानरूपः प्रज्ञानात्मा सर्ववस्तूनामेकत्वं - अद्वैतोपपत्तिः, न नानात्वं जन्यजनकत्वं च। स्वयं प्रविश्य तद्रूपेण वर्तत इत्यर्थः। वटबीजन्यायेन च

पूर्वसूत्रद्वयजनितं (अइउण्, ऋऌक्) वर्णपञ्चकमेव सकलजगत्कारणं। तदेवोक्तं वाक्यपदीय एकमेव यदाम्नातं, एकस्य सर्बीजस्य इत्यादि कारिकया। उत्तरसूत्रप्रतिपाद्यवर्णानामपि तस्मादेव सम्भवः।

ऐ औच्

ऐ औच् ब्रह्मस्वरूपः सन् जगत्स्वान्तर्गतं ततः।
इच्छया विस्तरं कर्तुमविरासीन्महामुनिः।। ६

स्वात्मभूतस्य परमेश्वरस्य जगत्कारणत्वं कथमित्याशङ्कायामाह - ऐ औजिति। ततः स्वान्तर्गतं जगद्विस्तारयितुमिच्छुः ऐ उ आदिशक्तियुक्तः अक्षरः। अतः पूर्वसूत्रगताकारेकारदीर्घयोगस्यैव ऐकारत्वम्। सम्यक्ज्ञानस्वरूपः परमेश्वरः यः स औ इति। पूर्वसूत्रगत अकारोकारवर्धस्यैव योगे औकारत्वम्। यः प्रज्ञानात्मा मायाशबलितः स औकारो यः स आ उ इत्याविर्भावे उक्तं च स्वात्विमर्शिन्याम् - 'उकारज्ञानसंयोगात्सर्वसंभूतिरिष्यते' इति। आदिशक्तियुक्तः सम्यक्ज्ञानस्वरूपः परमेश्वरः स्वान्तर्गतं जगत् विस्तारयितुं इच्छुः आविरासीत्।

हयवरट्

भूतपञ्चकमेतस्माद्धयवरण्महेश्वरात्
व्योमवाय्वम्बुवह्न्याख्यभूतान्यासीत्स एव हि। ७

ततः आत्मनः सकाशाद्वाकाशादिभूतसंभवमाह - भूतपञ्चकमिति।

हकाराद्व्योमसंज्ञश्च यकाराद्वायुरुच्यते
रकाराद्वह्निस्तोयं तु वकारादिति शैववाक्।। ८

'तस्माद्वा एतस्मादात्मनः आकाशः संभूतः आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी' इति श्रुतेः एतस्मात् परमेश्वरात् भूतपञ्चकमाकाशादिकं प्रपञ्चकारणमासीत्।

अत्र अस्मिन् सूत्रे भूतपञ्चकमासीदित्युक्तम्। तत्र आकाशादिभूतचतुष्टयमेवोक्तं न पृथिवी इत्याकाङ्क्षायां यदाधारस्वरूपं समस्तकारणमिति सूत्रान्तरेण अवोचत् -

लण्

आधारभूतं भूतानामन्नादीनां च कारणम्
अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम्।। ९

भूतानां प्राणिजातानां उद्भिजस्वेदजजरायुजाण्डजादीनां प्रधानकारणत्वादाधारभूता पृथिवी।

ञमङणनम्

शब्दस्पर्शौ रूपरसगन्धाश्च ञमङणनम्
व्योमादीनां गुणा ह्येते जानीयात्सर्ववस्तुषु। १०

अनया कारिकया अन्नपानयानादीनां कारणत्वेन स्थितानां तन्मात्राणामुत्पत्तिक्रममाह। व्योमादीनां गुणानेकैककारणनेतान् जानीयात्।

'पञ्चवर्गेष्वन्तिमवर्णाः शब्दस्पर्शादयो गुणाः' इति वचनात् सर्वजगत्कारणभूतस्य वर्णरूपपुरुषस्य सर्वेषां च व्योमादिगुणा इत्यर्थः।

झभञ, घढधष्

वाक्पाणी च झभञासीद्विराट्रूपं चिदात्मनः
सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते।। ११
वर्गाणां तुर्यवर्णा ये कर्मेन्द्रियपदा हि ते
घढधष् सर्वभूतानां पादपायू उपस्थकः।। १२
कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः।।

ततः सूत्राभ्यां कर्मेन्द्रियवर्गान् प्रतिपादयति वाक्पाणी इति। परमात्मनः चिद्रूपशिवस्य प्राणिजातस्य च झकारभकारौ स्थावरादिषु विना विराट्रूपं विज्ञेयं इत्यर्थः। एवं इमे कर्मेन्द्रियगणाः सर्वजन्तूनां पादपायूपस्था घढधष् वर्णजाता इत्यर्थः।

जबगडदश्

श्रोत्रत्वङ्नयनघ्राणजिह्वाधीन्द्रियपञ्चकम्।
सर्वेषामपि जन्तूनामीरितं जबगडदश।। १३

अनया कारिकया ज्ञानेन्द्रियसम्भवः प्रतिपादयति। 'वर्गाणां मध्यवर्णोत्थो ज्ञानेन्द्रियगणः स्मृतः' इति वचनात् जबगडदवर्णसम्भवो ज्ञानेन्द्रियगणः इति। सर्वत्र सर्वेषां प्राणिजातानां एते वर्णाः ज्ञानेन्द्रियाणां जनका इति वा ज्ञातव्यमित्यर्थः। (श्रोत्रं, त्वक्, नयनं, घ्राणं जिह्वा इति ज्ञानेन्द्रियाः)।

खफछठथचटतव्

प्राणादिपञ्चकं चैव मनोबुद्धिरहंकृतिः
बभूव कारणत्वेन खफछठथचटतव्।। १४
वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पञ्च वायवः
मध्यवर्गत्रयाज्जाता अन्तःकरणवृत्तयः।। १५

ततः प्राणादिपञ्चकमनोबुद्ध्यहंकाराः समुन्मील्यन्ते प्राणादिति कारिकया। एतैः अष्टवर्णैः प्राणादिपञ्चमनोबुद्ध्यहंकृतयश्च जगतां कारणत्वेन संभूता इत्यर्थः।

कपय्

अन्यद्वयसमुद्भूतौ पुरुषः प्रकृतिर्गुणः।।
प्रकृतिं पुरुषं चैव सर्वेषामेव निश्चितम्
सम्भूतमिति विज्ञेयं कपाभ्यामिति निश्चितम्।। १६

ततः सर्वप्राणिकारणत्वेन आद्यन्तवर्गद्वयाद्यक्षरग्रहणेन सम्पुटीभावं प्रकृतिपुरुषाभ्यां स्फुटीकरोति प्रकृतिमिति कारिकया। ककारपकारजातौ प्रकृतिपुरुषौ इत्यर्थः।

शषसर्

सत्वं रजस्तम इति गुणानां त्रितयं पुरा
समाश्रित्य महादेवः शषसर् क्रीडति प्रभुः। १७
शकाराद्राजसं रूपं षकारात्तामसोद्भवः
सकारात्सत्वसंभूतिरिति त्रिगुणसंभवः।। १८

ततः अवस्थात्रयं निरूपयति - सत्वरजस्तम इति कारिकया। सृष्टेः प्राक् शषसवर्णसंभूतान् सत्त्वरजस्तमोगुणान् आश्रित्य परमशिवः सर्वभूतेषु क्रीडति इत्यर्थः।

तत्वातीतः परः साक्षी सर्वानुग्रहविग्रहः
अहमात्मा परो हल् स्यादिति शंभुस्तिरोदधे।। १९

सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतः हल् स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशन् तिरोदधे इत्यर्थः। यदो वा इमानि भूतानि... इति श्रुतिः।

ग्रन्थसूची

१. नन्दिकेश्वरकाशिका कारिका - १
२. नन्दिकेश्वरकाशिका कारिका - ३
३. नन्दिकेश्वरकाशिका कारिका - ४
४. नन्दिकेश्वरकाशिका कारिका - १०
५. नन्दिकेश्वरकाशिका कारिका - १३
६. नन्दिकेश्वरकाशिका कारिका - १४
७. नन्दिकेश्वरकाशिका कारिका - १५
८. नन्दिकेश्वरकाशिका कारिका - १६
९. नन्दिकेश्वरकाशिका कारिका - १७
१०. नन्दिकेश्वरकाशिका कारिका - १८
११. नन्दिकेश्वरकाशिका कारिका - १९
१२. नन्दिकेश्वरकाशिका कारिका - २०
१३. नन्दिकेश्वरकाशिका कारिका - २१
१४. नन्दिकेश्वरकाशिका कारिका - २२
१५. नन्दिकेश्वरकाशिका कारिका - २३

१६. नन्दिकेश्वरकाशिका कारिका - २४

१७. नन्दिकेश्वरकाशिका कारिका - २५

१८. नन्दिकेश्वरकाशिका कारिका - २६

१९. नन्दिकेश्वरकाशिका कारिका - २७